শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীশঙ্করাচার্য ৱিরচিতম্

# ॥ শ্রী গঙ্গাষ্টকম্ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রী গঙ্গাষ্টকম্ ॥

ভগৱতি তৱ তীরে নীরমাত্রাশনোঽহং
বিগতৱিষযতৃষ্ণঃ কৃষ্ণমারাধযামি।
সকলকলুষভঙ্গে স্বর্গসোপানসঙ্গে
তরলতরতরঙ্গে দেৱি গঙ্গে প্রসীদ॥ **1** ॥

ভগৱতি ভৱলীলামৌলিমালে তৱাম্ভঃ
কণমণুপরিমাণং প্রাণিনো যে স্পৃশন্তি।
অমরনগরনারীচামরগ্রাহিণীনাং
ৱিগতকলিকলঙ্কাতঙ্কমঙ্কে লুঠন্তি॥ **2** ॥

ব্রহ্মাণ্ডং খণ্ডযন্তী হরশিরসি জটাৱল্লিমুল্লাসযন্তী
স্বর্লোকাদাপতন্তী কনকগিরিগুহাগণ্ডশৈলাৎস্খলন্তী।
ক্ষোণীপৃষ্ঠে লুঠন্তী দুরিতচযচমূর্নির্ভরং ভর্ত্সযন্তী
পাথোধিং পূরযন্তী সুরনগরসরিৎপাৱনী নঃ পুনাতু॥ **3** ॥

মজ্জন্মাতঙ্গকুম্ভচ্যুতমদমদিরামোদমত্তালিজালং
স্নানৈঃ সিদ্ধাঙ্গনানাং কুচযুগৱিগলৎকুঙ্কুমাসঙ্গপিঙ্গম্।
সাযম্প্রাতর্মুনীনাং কুশকুসুমচযৈশ্ছন্নতীরস্থনীরং
পাযান্নো গাঙ্গমম্ভঃ করিকলভকরাক্রান্তরংহস্তরঙ্গম্॥ **4** ॥

আদাৱাদিপিতামহস্য নিযমৱ্যাপারপাত্রে জলং
পশ্চাৎপন্নগশাযিনো ভগৱতঃ পাদোদকং পাৱনম্।
ভূযঃ শম্ভুজটাৱিভূষণমণির্জহ্নোর্মহর্ষেরিযং
কন্যা কল্মষনাশিনী ভগৱতী ভাগীরথী দৃশ্যতে॥ **5** ॥

শৈলেন্দ্রাদৱতারিণী নিজজলে মজ্জজ্জনোত্তারিণী
  পারাৱারৱিহারিণী ভৱভযশ্রেণীসমুৎসারিণী।
শেষাহেরনুকারিণী হরশিরোৱল্লীদলাকারিণী
  কাশীপ্রান্তৱিহারিণী ৱিজযতে গঙ্গা মনোহারিণী॥ **6**॥

কুতো ৱীচির্ৱীচিস্তৱ যদি গতা লোচনপথং
  ৎৱমাপীতা পীতাম্বরপুরনিৱাসং ৱিতরসি।
ৎৱদুৎসঙ্গে গঙ্গে পততি যদি কাযস্তনুভৃতাং
  তদা মাতঃ শাতক্রতৱপদলাভোঽপ্যতিলঘুঃ॥ **7**॥

গঙ্গে ত্রৈলোক্যসারে সকলসুরৱধূধৌতৱিস্তীর্ণতোযে
  পূর্ণব্রহ্মস্ৱরূপে হরিচরণরজোহারিণী স্ৱর্গমার্গে।
প্রাযশ্চিত্তং যদি স্যাত্তৱ জলকণিকা ব্রহ্মহত্যাদিপাপে
  কস্ত্ৱাং স্তোতুং সমর্থস্ত্রিজগদঘহরে দেৱি গঙ্গে প্রসীদ॥ **8**॥

মাতর্জাহ্নৱি শম্ভুসঙ্গৱলিতে মৌলৌ নিধাযাঞ্জলিং
  ৎৱত্তীরে ৱপুষোঽৱসানসমযে নারাযণাঙ্ঘ্রিদ্ৱযম্।
সানন্দং স্মরতো ভৱিষ্যতি মম প্রাণপ্রযাণোৎসৱে
  ভূযাদ্ভক্তিরৱিচ্যুতা হরিহরাদ্ৱৈতাত্মিকা শাশ্ৱতী॥ **9**॥

গঙ্গাষ্টকমিদং পুণ্যং যঃ পঠেৎপ্রযতো নরঃ।
সর্ৱপাপৱিনির্মুক্তো ৱিষ্ণুলোকং স গচ্ছতি॥ **10**॥

॥ শ্রী গঙ্গাষ্টকং সমাপ্তম্॥